स्याग्निना पच्यमानं मांसत्वम्, मांसञ्च स्वकोशस्थानलपरिपक्वं मेदस्त्वम्, मेदोऽपि स्वकोशवह्निना पक्वमस्थितताम्, अस्थ्यापि स्वकोशशिखिपरिपक्वं मज्जत्वम्, मज्जापि स्वकोशपावकपरिपच्यमानं चरमधातुतया परिणमते इति” जाठरस्य प्रकारान्तरेण पाचनादिदशविधकर्म्मकारित्वात् दशविधत्वमुक्तं पदार्थादर्शे यथा “भ्राजकोरञ्जकश्चैव क्लेदकः स्नेहकस्तथा धारको बन्धकश्चैव द्रावकाख्यश्च सप्तमः। व्यापकः पाचकश्चैव श्लेष्मको दशधा मत इति”। वैद्यके चास्य चतुर्विधकार्य्यविशेषकारित्वाच्चातुर्विध्यमुक्तम्। विषमश्च समस्तीक्ष्णो मन्दश्चेति चतुर्विधः। कफपित्तानलाधिक्यात् तत्साम्याज्जाठरोऽनलः। विषमो वातजान् रोगान्, तीक्ष्णः पित्तसमुद्भवान्, करोत्यग्निस्तथामन्दो विकारान् कफसम्भवान्। समाः समोऽग्निरशितमात्राः सम्यक् पचत्यसौ” इति ॥ अग्नेरतितीक्ष्णत्वे भस्मकसंज्ञा स हि सम्यगाहाराभावे शोणितादिधातूनपि पाचयित्वा आशु देहं नाशयतीति रक्षितः आहस्म। अधिकं कायशब्दे वक्ष्यते। वाह्यस्य भौमस्याग्नेः कर्म्मविशेषे नामान्युक्तानि विधानपारिजाते। यथा

“लौकिके पावकोह्यग्निः प्रथमः परिकीर्त्तितः। अग्निस्तु मारुतो नाम गर्भाधाने प्रकीर्त्तितः ॥ पुंसवे चमसो नाम शोभनः शुभकर्म्मसु। (शुङ्गकर्म्मणीति रघु०)। तच्च सीमन्तान्तर्गतकर्म्मभेदः। सीमन्ते ह्यनलो नाम प्रगल्भो जातकर्म्मणि ॥ पार्थिवो नामकरणे प्राशनेऽन्नस्य वै शुचिः। सभ्यनामा तु चूड़ायां व्रतादेशे समुद्भवः॥ गोदाने सूर्य्यनामा स्यात् केशान्ते याजकः स्मृतः। वैश्वानरो विसर्गे स्याद्विवाहे वलदः स्मृतः ॥ चतुर्थीकर्म्मणि शिखी धृतिरग्निस्तथाऽपरे। (अपरे कर्म्मणि) आवसथ्यस्तथाधाने वैश्वदेवे तु पावकः। ब्रह्माग्निर्गार्हपत्ये स्याद्दक्षिणाग्निरथेश्वरः। विष्णुराहवनीये स्यादग्निहोत्रे त्रयोमताः लक्षहोमेऽभीष्टदः स्यात् कोटिहोमे महाशनः। एके हुताचिषां प्राहुरग्निध्यानपरायणाः ॥ रुद्रादौ तु मृड़ो नाम शान्तिके शुभकस्तथा। आदिशब्दात् लघुरुद्रशतरुद्रातिरुद्रा लक्ष्यन्ते। (पूर्णाहुत्यां मृड़ो नामेति रघु०)। पौष्टिके वरदश्चैव क्रोधाग्निश्चाभिचारके। वश्यार्थे वशकृत् प्रोक्तो वनदाहे तु पोषकः। उदरे जठरो नाम क्रव्यादः शवभक्षणे। समुद्रे वाडवो ह्यग्निर्लये संवर्त्तकस्तथा ॥ सप्तविंशतिसंख्याता अग्नयः कर्मसु स्मृताः। तं तमाहूय होतव्यं यो यत्र विहितोऽनलः॥ अन्यथा विफलं कर्म सर्व्वं तद्राक्षसम्भवेत्। आदित्यादिग्रहाणां च साम्प्रतं ह्यग्निरुच्यते ॥ आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते। धूमकेतुस्तथा भौमे जठरोऽग्निर्बुधे स्मृतः ॥ बृहस्पतौ शिखी नाम शुक्रे भवति हाटकः। शनैश्चरे महातेजा राहौ केतौ हुताशनः इति ॥” यज्ञादौ तु पञ्च भेदाः “आवसथ्याहवनीयौ दक्षिणाग्निस्तथैव च। अन्वाहार्य्यो गार्हपत्य इत्येते पञ्च वह्नयः” इति शा०रा०घ०। “पञ्चाग्नयो ये च त्रिणाचिकेता” इति श्रुतिः। अग्नेर्ध्येयरूपं यथा “रुद्रतेजःसमुद्भूतं द्विमूर्द्धानं द्विनासिकम्। षण्नेत्रं च चतुःश्रोत्रं त्रिपादं सप्तहस्तकम्। याम्यभागे चतुर्हस्तं सव्यभागे त्रिहस्तकम्। स्रुवं स्रुचञ्च शक्तिं च अक्षमालां च दक्षिणे। तोमरं व्यजनं चैव घृतपात्रन्तु वामके। बिभ्रतं सप्तभिर्हस्तैर्द्विमुखं सप्तजिह्वकम्। दक्षिणञ्च चतुर्जिह्वं त्रिजिह्वमुत्तरं मुखम्। द्वादशकोटिमूर्त्त्याख्यं द्विपञ्चाशत्कलायुतम्। स्वाहास्वधावषट्कारैरङ्कितं मेषवाहनम्। रक्तमाल्याम्बरधरं रक्तं पद्मासनस्थितम् ॥ रौद्रं तु वह्निनामानं वह्निमावाहयाम्यहम्”। इति रुद्रकल्पः। अग्नेर्भौतिकत्वेऽपि कर्म्माङ्गहोमसाधनतया एवं ध्यातव्यता।

अग्न्यभिमानिनि चेतनाधिष्ठिते शरीरादावपि उपचारात् अग्निशब्दप्रयोगः। अग्न्यधिष्ठातरि देवभेदे “अग्निं दूतं वृणीमहे होतारं विश्ववेदस”मित्यादौ वेदे तस्यैव आह्वानपूर्व्वकोपास्यत्वमुक्तम्। तदधिष्ठितदेहभेदेऽपि, स एव विश्वनराज्जन्मासाद्य अग्निलोकाधिपत्यं चकारेति काशीखण्डे उक्तं तत्कथा वैश्वानरशब्दे वक्ष्यते। अग्निदेवताके कृत्तिकानक्षत्रे “अश्वियमदहने”त्यादिना ज्योतिषे कृत्तिकानक्षत्रस्य तत्स्वामिकत्वोक्तेः तद्देवताके प्रतिपत्तिथौ वह्नेस्तदाधिपत्यं तिथिशब्दे वक्ष्यते। तस्य बहुत्वेऽपि वेदत्रयभेदेन दक्षिणाग्निगार्हपत्याहवनीयनामतया प्राधान्येन त्रित्वात् “प्रधानेन व्यपदेशा भवन्तीति” न्यायात् तत्संख्यासदृशसंख्याके त्रित्वसंख्यान्विते, स्वोदयात् स्वाग्निलग्नं (३०) “यद्भुक्तं भोग्यं रवेस्त्यजेदिति” नीलकण्ठः। चित्रकवृक्षे (चिते) स्वर्णे तस्य तत्तेजोजातत्वात्तथा तत्कथा अग्निरेतःशब्दे वक्ष्यते भल्लातकवृक्षे (भेला) निम्बुकवृक्षे (नेवु) पित्ते धातौ तस्य तदुत्पन्नत्वात्तथा यथा च तस्य तदुत्पन्नत्वं तथोक्तं प्राक्। तत्स्वामिके अग्निकोणे च। एवमग्निवाचकाः सर्व्वेऽपि शब्दाः कृत्तिकानक्षत्रादौ वर्त्तन्ते। वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयमिति तिथित०। “हुताशे अग्निकोणे” अनलविधुशता-